आत्रेय शिक्षा

आम्नाया यस्य निःश्वासाश्चन्द्रसूर्यौ च चक्षुषी
तत् प्रणम्य परंजयोतिः शिक्षां वक्ष्यामि निर्मलाम् १

अचः स्वरा इति प्रोक्ता व्यञ्जनानि हलः स्मृताः
ह्रस्वदीर्घप्लुतावर्णोवर्णोवर्णा ऋ ॠ ऌ च २
एदैदोदौदिति ज्ञेयाः षोडशेहोदिताः स्वराः
कखौ गघौ ङचछजा झञौ टठडढा णतौ ३

थदौ धनौ पफबभा मः स्पर्शाः पञ्चविंशतिः
यरौ लवौ चतस्रोऽन्तस्थाश्च ःकशषसःपहाः ४

षडूष्माणो विसर्गोऽनुस्वारो ङो नास्यपञ्चकम्
इत्येते याजुषा वर्णा एकोना षष्टिरीरिताः ५

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः
स्वरितः कण्ठमूलीयः सर्वाङ्गे प्रचयः स्मृतः २८१

अङ्गमात्रादयो धर्माः पूर्वमेवोदिताश्च ये
तान् सर्वान् वर्णसारेऽस्मिन् तत्र तत्र प्रयोजयेत्

एवं सलक्षणं वेदं योऽधीतेऽध्यापयत्यपि ---
वेदांश्च श्रोत्रियं ब्रह्म ये के दुष्यन्ति मानवाः

ते घोरं नरकं प्राप्य जायन्ते भुवि सूकराः
वेदरूपविलसत् परात्परं ये पठन्ति विधिना द्विजोत्तमाः
ते त्रिवर्गमिह चानुभूय तच्छाश्वतं पदमवाप्नुयुः परम्

इत्यात्रेयशिक्षामूलं संपूर्णम् श्लोकसंख्या २९४